# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा -आचार्यद्वितीयवर्षम्** (SEM-3) | **प्रश्नपत्रम् – ४** | **गुणा: - ७०** |
| **विषय: - साहित्यम् ( काव्यवर्ग: )** | (C.C.-5.3.9. Old & New ) | |
| **दिनाङ्क: - ०७/१२/२०१८** | *ग्रन्थ: नैषधीयचरितम् सर्ग-१ त: ३* | **समय: -१०.०० त: ०१.००** |

**प्रथमान्विति:**

**प्रश्न: १ अधोलिखितेषु कयोश्चिद् एकस्य व्याख्या विधेया ।** **( ५ )**

*(१) यदस्य यात्रासु बलोद्धतं रज: स्फुरत्प्रतापाऽनल धूममञ्जिम।*
*तदैव गत्वा पतितं सुधाऽम्बुधौ दधाति पङ्कीभवदङ्कतां विधौ॥*

*(२) सिताऽशुवर्णैर्वयति स्म तद्गुणैर्महाऽसिवेम्न: सहकृत्वरी बहुम्।*
*दिगङ्गनाऽङ्गाभरणं रणाऽङ्गणे यश: पटं तद्भटचातुरी तुरी॥*

**प्रश्न: २** *भैम्याश्चरितं नैषधीयग्रन्थानुसारि विविच्यताम्।* **( १० )**

*(अथवा)*

*राज्ञो नलस्य चरितं नैषधीयचरितानुसारि वर्ण्यताम्।*

**द्वितीयान्विति:**

**प्रश्न: ३ अधोलिखितेषु केश्चिद् एकस्य श्लोकस्य व्याख्यां कुरुत ।** **( ५ )**

*(१) अलं नलं रोद्धुममी किलाऽभवन्गुणाविवेक प्रभवा न चापलम्।*
*स्मर: स रत्यामनिरुद्धमेव यत्सृजत्ययं सर्गनिसर्ग ईदृश:॥*

*(२) विलासवापीतटवीचिवादनाटिकाऽलिगीते: शिखिलास्यलाधवात्।*
*वनेऽपि तौर्यत्रिकमारराघतं, क्व भोगमाप्नोति न भाग्यभाग्जन:॥*

**प्रश्न: ४** *महाकाव्यलक्षणं विलिख्य तस्य नैषधीयचरिते सद्भाव: प्रतिपाद्य:।* **( १० )**

**( अथवा )**

*नैषधीयचरितमहाकाव्यस्य प्रथमसर्गस्य कथानकं समासेनोपवर्ण्यताम्।*

**तृतीयान्विति:**

**प्रश्न: ५ अधोलिखितेषु ग्रन्थाऽनुसारं कश्चिदेकस्य ससन्दर्भं व्याख्यां लिखत ।** **( ५ )**

*(१) भृशतापभृता मया भवान् मरुदासादि तुषारसारवान्।*
*धनिनामितर: सतां पुनर्गुणवत्सन्निधिरेव सन्निधि:॥*

*(२) अथवा भवत: प्रर्वतना न कथं पिष्टमियं पिनष्टि न:।*
*स्वत एव सतां परार्थता ग्रहाणानां हि मया यथार्थता॥*

**प्रश्नः ६** *द्वितीयसर्गस्य कथानकं वर्ण्यताम्।* **( १० )**

**( अथवा )**

*राज्ञो नलस्य चरितं नैषधीयचरितानुसारि वर्ण्यताम्।*

## चतुर्थान्वितिः

**प्रश्नः ७ निम्नलिखितेषु एकस्य श्लोकस्य व्याख्यां कुरुत ।** **( ५ )**

*(१) स्वर्गाऽऽपगाहेममृपालिनीनां नालामृणाकाऽग्रभुजोभजामः।*
*अन्नाऽनुरुपां तनुरुपऋद्धिं कार्यं निदानाद्धि गुणानधीते॥*

*(२) तदेकदासीत्वपदादुदग्रे मदीप्सते साधु विधित्सुता ते।*
*अहेलिना किं नलिनी विधत्ते सुधाकरेणाऽपि सुधाकरेण ?॥*

**प्रश्नः ८** *नारदेन्द्रसंवादः संस्कृतेन चारुविलेख्यः।* **( १० )**

**( अथवा )**

*ग्रन्थाऽनुसारेण तृतीयसर्गस्य कथानकं विवेच्यताम्।*

**प्रश्नः ९ यच्थेछं दशलघुत्तराणि लिखत ।** **( १० )**

*(१) नैषधीयचरितस्य रचयिता कः ?*
*(२) महाकवेः श्रीहर्षस्य  पितुः किं नामासीत् ?*
*(३) श्री हर्षः कस्मिन् राज्ये सभापण्डितः आसीत् ?*
*(४) नैषधीयचरिते कति सर्गाः सन्ति ?*
*(५) नैषधीयचरिते का नायिका ?*
*(६) नलः कीदृशः नायकोऽस्ति ?*
*(७) नैषधीयचरिते प्रधानः रसः कोऽस्ति ?*
*(८) किं विद्वदौषधम् ?*
*(९) कस्य विद्या रसनाग्रनर्तकी ?*
*(१०) नैषधीयचरितस्य प्रथमसर्गे किं छन्दः प्रयुक्तम् ?*
*(११) नलस्य वपुः किमालिङ्गात् ?*
*(१२) भीमनरेन्द्रनन्दना का ?*
*(१३) स्मरः रत्यां कं सृजति ?*
*(१४) पदे पदे के सन्ति ?*
*(१५) भीमनृपतेः नगरस्य किं नामासीत् ?*

--००--